# NŌṬṬU SVARA SĀHITYAMS

MUTTUSVĀMI DĪKṢITAR

(WITH NOTATIONS)

santataṁ pāhi māṁ saṅgīta śyamaḷē sarvādhārē janani rē janani | cintitārthapradē cidrūpiṇi śivē śrīguruguhasēvitē śivamōhākārē ||

santataṁ pāhi māṁ saṅgīta śyamaḷē sarvādhārē janani rē janani | cintitārthapradē cidrūpiṇi śivē śrīguruguhasēvitē śivamōhākārē ||

© February 2008

(TYPESET USING LATEX 2ε AND PSTricks)

PPN

# अनुक्रमणिका


१ आञ्जनेयम् . . . . ४
२ कमलासनवन्दित . . . . ५
३ काञ्चीशम् . . . . ६
४ गुरुगुहपदपङ्कज . . . . ७
५ गुरुगुह सरसिज . . . . ८
६ गुरुमूर्ते . . . . ९
७ चिन्तय चित्त . . . . ११
८ चिन्त्ययेऽहं सदा . . . . १२
९ जगदीश गुरुगुह . . . . १४
१० दाशरथे . . . . १५
११ दीनबन्धो . . . . १६
१२ पङ्कजमुख . . . . १७
१३ परदेवते भक्तभवमोदिनि . . . . १८
१४ पार्वतीपते . . . . १९
१५ पाहि दुर्गे . . . . २०
१६ पाहि मां जनकीवल्लभ . . . . २१
१७ पीतवर्णम् . . . . २२
१८ माये चित्कले . . . . २३
१९ मुचुकुन्दवरद . . . . २४
२० राजीवलोचनम् . . . . २५
२१ रामचन्द्रं राजीवाक्षम् . . . . २७
२२ राम जनार्दन . . . . २८
२३ वन्दे मीनाक्षि . . . . २९
२४ वरदराज पहि . . . . ३०
२५ वरशिवबालम् . . . . ३१
२६ वाग्देवि मामव . . . . ३२
२७ शक्तिसहितगणपतिम् . . . . ३३
२८ शङ्करवर . . . . ३४
२९ शौरिविधिनुते . . . . ३५
३० श्यामळे मीनाक्षि . . . . ३६

३१ सकलसुरविनुत . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ३७
३२ सदाशिवजाये . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ३८
३३ सन्ततं गोविन्दराजम् . . . . . . . . . . . . . . . . . . . . . . . . . . . . ३९
३४ सन्ततं पाहि माम् . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ४०
३५ सन्तानसौभाग्य . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ४१
३६ सामगानप्रिये . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ४२
३७ सुब्रह्मण्यम् . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ४३
३८ सोमास्कन्दम् . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ४४
३९ हे माये . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ४५

# आञ्जनेयम्

रागं: शङ्कराभरणम् (२९) ताळं: तिश्र एकम्

*नोट्टुस्वर साहित्यम्*

आञ्जनेयं सदा भावयामि अप्रमेयं मुदा चिन्तयामि
अञ्जनानन्दनं वानरेशं वरं पञ्चवक्त्रं सुरेशादिवन्द्यम्[१]
गुरुगुह हितं शान्तं सदासेवितश्रीरामपादपङ्कजं
सञ्जीविपर्वतहरं मुखाब्जं सदा रामचन्द्रदूतं भजे

✠ ✠ ✠ ✠ ✠

## *āñjaneyam*

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: tiśra ekam

*noṭṭusvara sāhityam*

āñjaneyaṁ sadā bhāvayāmi aprameyaṁ mudā cintayāmi
añjanānandanaṁ vānareśaṁ varaṁ pañcavaktraṁ sureśādivandyam
guruguha hitaṁ śāntaṁ sadāsevitaśrīrāmapādapaṅkajaṁ
sañjīviparvataharaṁ mukhābjaṁ sadā rāmacandradūtaṁ bhaje

✠ ✠ ✠ ✠ ✠

[१] Subbarāma Dīkṣitar has given only the first two lines of this song (with notation) in his book, "*Prathamābhyāsa Pustakamu*".

# कमलासनवन्दित

रागं: शङ्कराभरणम् (२९)    ताळं: चतुरश्र एकम्

*नोट्टुस्वर साहित्यम्*

कमलासनवन्दितपादाब्जे कमनीयकरोदयसाम्राज्ये
कमलानगरे सकलाकारे कमलनयनधृतजगदाधारे
कमले विमले गुरुगुह जननि कमलापतिनुतहृदये माये
कमलशशिविजयवदनेऽमेये कमलेन्द्राणीवाग्देवीश्री-
गौरीपूजितहृदयानन्दे कमलाक्षि पाहि कामाक्षि
कामेश्वरवरसति कल्याणि

✠ ✠ ✠ ✠ ✠

## *kamalāsanavandita*

rāgaṁ: śaṅkarābharaṇam (29)    tāḷaṁ: caturaśra ekam

***noṭṭusvara sāhityam***

kamalāsanavanditapādābje kamanīyakarodayasāmrājye
kamalānagare sakalākāre kamalanayanadhṛtajagadādhāre
kamale vimale guruguha janani kamalāpatinutahṛdaye māye
kamalaśaśivijayavadane'meye kamalendrāṇīvāgdevīśrī-
gaurīpūjitahṛdayānande kamalākṣi pāhi kāmākṣi
kāmeśvaravarasati kalyāṇi

✠ ✠ ✠ ✠ ✠

# काञ्चीशम्

रागं: शङ्कराभरणम् (२९)   ताळं: तिश्र एकम्

*नोट्टुस्वर साहित्यम्*

काञ्चीशमेकाम्रनायकं नित्यमहं भजे
कामादिषट्चोरवृत्तिमहं त्यजे
पञ्चाक्षररूपमागमान्तसारं
पञ्चास्यमादिकारणं विश्वेश्वरं गुरुगुहम्

✠ ✠ ✠ ✠ ✠

## *kāñcīśam*

rāgaṁ: śaṅkarābharaṇam (29)   tāḷaṁ: tiśra ekam

***noṭṭusvara sāhityam***

kāñcīśamekāmranāyakaṁ nityamahaṁ bhaje
kāmādiṣaṭcoravṛttimahaṁ tyaje
pañcākṣararūpamāgamāntasāraṁ
pañcāsyamādikāraṇaṁ viśveśvaraṁ guruguham

✠ ✠ ✠ ✠ ✠

# गुरुगुहपदपङ्कज

रागं: शङ्कराभरणम् (२९)  ताळं: तिश्र एकम्

*नोट्टुस्वर साहित्यम्*

गुरुगुह पदपङ्कजमतिगुप्तमनिशमाश्रये
निरतिशयनिजप्रकाशकनित्यसुखफलप्रदम्
नीरजनाभपुरन्दरमारारिवारिजसंभववेदितव्यं
अत्रिशुकवसिष्टवामदेवादितपोधनवन्दितम्

✠ ✠ ✠ ✠ ✠

## *guruguhapadapaṅkaja*

rāgaṁ: śaṅkarābharaṇam (29)  tāḷaṁ: tiśra ekam

***noṭṭusvara sāhityam***

guruguha padapaṅkajamatiguptamaniśamāśraye
niratiśayanijaprakāśakanityasukhaphalapradam
nīrajanābhapurandaramārārivārijasaṁbhavaveditavyaṁ
atriśukavasiṣṭavāmadevāditapodhanavanditam

✠ ✠ ✠ ✠ ✠

# गुरुगुह सरसिज

रागं: शङ्कराभरणम् (२९) ताळं: चतुरश्र एकम्

*नोट्टुस्वर साहित्यम्*

गुरुगुह सरसिजकरपदशुभकरमूर्त्ते
सुरवर शिवसुत भुवनपते
मुरहरहरिहयविधिनुतबहुविधकीर्त्ते
नरपतिनतमुनिसुतसुमते
निरुपम जयकर निरतिशयसुखद
सरस सततमव स्थिततरशक्ते

✠ ✠ ✠ ✠ ✠

## *guruguha sarasija*

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: caturaśra ekam

***noṭṭusvara sāhityam***

guruguha sarasijakarapadaśubhakaramūrtte
suravara śivasuta bhuvanapate
muraharaharihayavidhinutabahuvidhakīrtte
narapatinatamunisutasumate
nirupama jayakara niratiśayasukhada
sarasa satatamava sthitataraśakte

✠ ✠ ✠ ✠ ✠

# ६ गुरुमूर्ते

## गुरुमूर्ते[२]

रागं: शङ्कराभरणम् (२९) ताळं: रूपकम्

### *पल्लवि*

गुरुमूर्ते बहुकीर्ते सुरसेनाधिपते श्री

### *अनुपल्लवि*

सुरसेवित शिवभावित सुमतेऽनिशमव मां श्री

### *चरणम्*

सरसीरुहभववन्दित सकलागमनुतदेव

(*मध्यमकालसाहित्यम्*)

सुरपतितनुजाधिपते सुरवर करुणाजलधे

गिरिजात्मज षण्मुखभव गुरुगुह शरवणभव श्री

✠ ✠ ✠ ✠ ✠

## *gurumūrte*

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: rūpakam

### *pallavi*

gurumūrte bahukīrte surasenādhipate śrī

### *anupallavi*

surasevita śivabhāvita sumate'niśamava māṁ śrī

[२] Subbarāma Dīkṣitar does not treat this composition as a *nōṭṭu svara shāhityam*, and considers it as a *kīrtanam*. He has includes this *kīrtanam* in both "*Saṁgīta saṁpradāya pradarśini*", and "*Prathamābhyāsa pustakamu*".

## *caraṇam*

sarasīruhabhavavandita sakalāgamanutadeva

( *madhyamakālasāhityam*)

surapatitanujādhipate suravara karuṇājaladhe
girijātmaja ṣaṇmukhabhava guruguha śaravaṇabhava śrī

✠ ✠ ✠ ✠ ✠

## ७ चिन्तय चित्त

# चिन्तय चित्त [३]

रागं: शङ्कराभरणम् (२९) तालं: तिश्र एकम्

*नोट्टुस्वर साहित्यम्*

चिन्तय चित्त श्रीपरमेश्वरं

चिन्तितभक्तिं गुरुगुह -

वन्दितमूर्तिं विश्वोत्पत्तिं

बहुतरकीर्तिं भक्तप्रीतम्

सन्ततमच्युत पङ्कजभवनुत -

शङ्करं कान्तिका (काञ्चीशम् ?)

✠ ✠ ✠ ✠ ✠

## *cintaya citta*

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: tiśra ēkam

*नोट्टुस्वर साहित्यम्*

cintaya citta śrīparamēśvara.m

cintitabhaktiṁ guruguha -

vanditamūrtiṁ viśvōtpattiṁ

bahutarakīrtiṁ bhaktaprītam

santatamacyuta paṅkajabhavanuta-

śaṅkaraṁ kāntikā (kāñcīśam ?)

✠ ✠ ✠ ✠ ✠

[३] not printed in Subbarāma Dīkṣitar's "*Prathamābhyāsa pustakamu*".

# चिन्ययेऽहं सदा

रागं: शङ्कराभरणम् (२९) ताळं: चतुरश्र एकम्

*नोट्टुस्वर साहित्यम्*

चिन्तयेऽहं सदा चित्सभानायकं
चिन्तितार्थदायकं जीवेश्वरभेदापहम्
चिन्तामणिस्वरूपं ताण्डवेश्वरं
शान्तं मुनिमहितं स गुरुगुहं शङ्करम्
सन्ततं साम्बमीशं मुधा भावयेऽ-
नन्तकोटिब्रह्माण्डनाथं विमलम्
आदिमध्यान्तवर्जं निराधारमाकाशनादान्तस्थं
सुन्दरं सुधांशुमौलिं शिवं भ्रान्तिवारणनिपुणम्
भानुकोटिभास्वरं दन्तिचर्माम्बरं धनदहितं
भारतीकान्तहरिनुतं करधृतमृगमेकान्तहृदये
शिवकामसुन्दरीपतिम्

✠ ✠ ✠ ✠ ✠

## *cinyaye'haṁ sadā*

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: caturaśra ekam

***noṭṭusvara sāhityam***

cintaye'haṁ sadā citsabhānāyakaṁ
cintitārthadāyakaṁ jīveśvarabhedāpaham
cintāmaṇisvarūpaṁ tāṇḍaveśvaraṁ
śāntaṁ munimahitaṁ sa guruguhaṁ śaṅkaram

santataṁ sāmbamīśaṁ mudhā bhāvaye'-
nantakoṭibrahmāṇḍanāthaṁ vimalam
ādimadhyāntavarjaṁ nirādhāramākāśanādāntasthaṁ
sundaraṁ sudhāṁśumauliṁ śivaṁ bhrāntivāraṇanipuṇam
bhānukoṭibhāsvaraṁ danticarmāmbaraṁ dhanadahitaṁ
bhāratīkāntaharinutaṁ karadhṛtamṛgamekāntahṛdaye
śivakāmasundarīpatim

✠ ✠ ✠ ✠ ✠

## ९ जगदीश गुरुगुह

# जगदीश गुरुगुह

रागं: शङ्कराभरणम् (२९) ताळं: चतुरस्र एकम्

*नोट्टुस्वर साहित्यम्*

जगदीश गुरुगुह हरिविधिविनुतं
देहेन्द्रियविलक्षणमानन्दलक्षणम्
नित्यशुद्धं बुद्धं मुक्तं सत्यनिर्वि-
कल्पनिष्प्रपञ्चमानन्दमजं श्री

✠ ✠ ✠ ✠ ✠

## *jagadīśa guruguha*

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: caturaśra ekam

***noṭṭusvara sāhityam***

jagadīśa guruguha harividhivinutaṁ
dehendriyavilakṣaṇamānandalakṣaṇam
nityaśuddhaṁ buddhaṁ muktaṁ satyanirvi-
kalpaniṣprapañcamānandamajaṁ śrī

✠ ✠ ✠ ✠ ✠

# दाशरथे

रागं: शङ्कराभरणम् (२९)      ताळं: तिश्र एकम्

*नोट्टुस्वर साहित्यम्*

दाशरथे दीनबन्धो दानवभीकर दामोदर
केशव मामव सीताधव केयूरहार रघुवीर
कोमलपादाब्ज कोदण्डराम श्यामळविग्रह संपूर्णकाम
नामकीर्त्तने सदामोद नारदवीणाह्ळादाह्ळाद

✠ ✠ ✠ ✠ ✠

## *dāśarathe*

rāgaṁ: śaṅkarābharaṇam (29)      tāḷaṁ: tiśra ekam

***noṭṭusvara sāhityam***

dāśarathe dīnabandho dānavabhīkara dāmodara
keśava māmava sītādhava keyūrahāra raghuvīra
komalapādābja kodaṇḍarāma śyāmaḷavigraha saṁpūrṇakāma
nāmakīrttane sadāmoda nāradavīṇāhḷādāhḷāda

✠ ✠ ✠ ✠ ✠

# दीनबन्धो

रागं: शङ्कराभरणम् (२९)  तालं: तिस्र एकम्

*नोट्टुस्वर साहित्यम्*

दीनबन्धो दयासिन्धो सुधीमणे मे मुदं देहि सदा देहि
जानकीनायकाम्भोजानन साधुसंरक्षणा-
पाङ्गाखिलदेवतासार्वभौमादिवन्द्य

✠ ✠ ✠ ✠ ✠

## *dīnabandho*

rāgaṁ: śaṅkarābharaṇam (29)  tāḷaṁ: tiśra ekam

***noṭṭusvara sāhityam***

dīnabandho dayāsindho sudhīmaṇe me mudaṁ dehi sadā dehi
jānakīnāyakāmbhojānana sādhusaṁrakṣaṇā-
pāṅgākhiladevatāsārvabhaumādivandya

✠ ✠ ✠ ✠ ✠

# पङ्कजमुख

रागं: शङ्कराभरणम् (२९) तालं: तिश्र एकम्

*नोट्टुस्वर साहित्यम्*

पङ्कजमुख शङ्खरहित सङ्कटहर
वेङ्कटगिरिवास नारायणा-
नन्त गोविन्द दामोदरानन्द संरक्षकाश्रित-
वात्सल्य पादाम्भोरुह पाहि मां दीनबन्धो

✠ ✠ ✠ ✠ ✠

## *paṅkajamukha*

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: tiśra ekam

***noṭṭusvara sāhityam***

paṅkajamukha śaṅkharahita saṅkaṭahara
veṅkaṭagirivāsa nārāyaṇā-
nanta govinda dāmodarānanda saṁrakṣakāśrita-
vātsalya pādāmbhoruha pāhi māṁ dīnabandho

✠ ✠ ✠ ✠ ✠

# परदेवते भक्तभवमोदिनि

रागं: शङ्कराभरणम् (२९) ताळं: रूपकम्

*नोट्टुस्वर साहित्यम्*

परदेवते भवभक्तमोदिनि पाहि मां पालिनि
हंसिनि करुणाकरि कमलाक्षि सुन्दरि कामिनि
कौळिनि शङ्करि परिशुद्धचित्तरञ्जनि मालिनि
पादपङ्केरुहपद्मिनि गुरुशिष्यरूपधारिणि
कोमळाकारिणि मन्त्रिणि योगिनि श्री

✠ ✠ ✠ ✠ ✠

## *paradevate bhaktabhavamodini*

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: rūpakam

***noṭṭusvara sāhityam***

paradevate bhavabhaktamodini pāhi māṁ pālini
haṁsini karuṇākari kamalākṣi sundari kāmini
kauḷini śaṅkari pariśuddhacittarañjani mālini
pādapaṅkeruhapadmini guruśiṣyarūpadhāriṇi
komaḷākāriṇi mantriṇi yogini śrī

✠ ✠ ✠ ✠ ✠

# पार्वतीपते

रागं: शङ्कराभरणम् (२९) ताळं: चतुरश्र एकम्

*नोट्टुस्वर साहित्यम्*

पार्वतीपते सदा पालयाशु शम्भो
पादसरोजानन्दनटनधीर विभो श्रीप्रभो
गर्वितदानवभीकर शङ्कर देवदेव गोक्षीराभाङ्गाकारण [४]
वर्णरूपाकार कामाक्षीश एकाम्रपते गुरुगुह

✠ ✠ ✠ ✠ ✠

## *pārvatīpate*

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: caturaśra ekam

***noṭṭusvara sāhityam***

pārvatīpate sadā pālayāśu śambho
pādasarojānandanaṭanadhīra vibho śrīprabho
garvitadānavabhīkara śaṅkara devadeva gokṣīrābhaṅgākāra
varṇarūpākāra kāmākṣīśa ekāmrapate guruguha

✠ ✠ ✠ ✠ ✠

[४]गोक्षीर भङ्गीतर

# पाहि दुर्गे

रागं: शङ्कराभरणम् (२९) तालं: चतुरश्र एकम्

*नोट्टुस्वर साहित्यम्*

पाहि दुर्गे भक्तं ते पद्मकरे विजयचिच्छक्ते
एहि देहि सर्वज्ञे यतिनुतगणपति गुरुगुह जननि माम्

✠ ✠ ✠ ✠ ✠

## *pāhi durge*

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: caturaśra ekam

***noṭṭusvara sāhityam***

pāhi durge bhaktaṁ te padmakare vijayacicchakte
ehi dehi sarvajñe yatinutagaṇapati guruguha janani mām

✠ ✠ ✠ ✠ ✠

# पाहि मां जनकीवल्लभ

रागं: शङ्कराभरणम् (२९) तालं: तिश्र एकम्

*नोट्टुस्वर साहित्यम्*

पाहि मां जानकीवल्लभ श्रीहरे भारतीशप्रियानन्तमूर्ते
देहि मे संपदं दीनचिन्तामणे देव देवोत्तमानन्दकीर्ते
एहि काकुत्स्थ कोदण्डहस्त ईप्सितार्थप्रदाह्ळादचित्त
एहि काकुत्स्थ कोदण्डहस्त ईप्सितार्थप्रदाह्ळादचित्त

✠ ✠ ✠ ✠ ✠

## *pāhi māṁ janakīvallabha*

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: tiśra ekam

***noṭṭusvara sāhityam***

pāhi māṁ jānakīvallabha śrīhare bhāratīśapriyānantamūrte
dehi me saṁpadaṁ dīnacintāmaṇe deva devottamānandakīrte
ehi kākutstha kodaṇḍahasta īpsitārthapradāhḷādacitta
ehi kākutstha kodaṇḍahasta īpsitārthapradāhḷādacitta

✠ ✠ ✠ ✠ ✠

# पीतवर्णम्

रागं: शङ्कराभरणम् (२९) तालं: तिश्र एकम्

*नोट्टुस्वर साहित्यम्*

पीतवर्णं भजे भैरवं भूतवेताळसंसेव्यमानं
पीतवस्त्रं सुवर्णप्रदं वीतरागं गुरुगुहा त्मकम्

✠ ✠ ✠ ✠ ✠

## *pītavarṇam*

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: tiśra ekam

***noṭṭusvara sāhityam***

pītavarṇaṁ bhaje bhairavaṁ bhūtavetāḷasaṁsevyamānaṁ
pītavastraṁ suvarṇapradaṁ vītarāgaṁ guruguhā tmakam

✠ ✠ ✠ ✠ ✠

# माये चित्कले

रागं: शङ्कराभरणम् (२९) तालं: तिश्र एकम्

*नोट्टुस्वर साहित्यम्*

माये चित्कले जय रमे मङ्गळकर-
रङ्गरमणि मारजननि विष्णुजाये
देहि श्रियं अब्जमालिनि दृश्यविश्वविलासे
एहि वरलक्ष्मि सुन्दरि दीप्यमान-
पादतले पद्मे दिव्यतेजोमयि रक्ष मां
रञ्जनि देवतापूजितश्री गुरुगुहे

✠ ✠ ✠ ✠ ✠

**_māye citkale_**

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: tiśra ekam

**_noṭṭusvara sāhityam_**

māye citkale jaya rame maṅgaḷakara-
raṅgaramaṇi mārajanani viṣṇujāye
dehi śriyaṁ abjamālini dṛśyaviśvavilāse
ehi varalakṣmi sundari dīpyamāna-
pādatale padme divyatejomayi rakṣa māṁ
rañjani devatāpūjitaśrī guruguhe

✠ ✠ ✠ ✠ ✠

## १९ मुचुकुन्दवरद

# मुचुकुन्दवरद

रागं: शङ्कराभरणम् (२९)      ताळं: तिश्र एकम्

*नोट्टुस्वर साहित्यम्*

मुचुकुन्दवरद त्यागराज सुन्दरकर
पादारविन्द सरसमन्दहासवदन जय विभो
मुकुन्दपूजिताङ्गधवलसुन्दरतर
नन्दीशनन्दित सुरबृन्दवन्दित गुरुगुह गुरो

✠ ✠ ✠ ✠ ✠

## *mucukundavarada*

rāgaṁ: śaṅkarābharaṇam (29)      tāḷaṁ: tiśra ekam

***noṭṭusvara sāhityam***

mucukundavarada tyāgarāja sundarakara
pādāravinda sarasamandahāsavadana jaya vibho
mukundapūjitāṅgadhavalasundaratara
nandīśanandita surabṙndavandita guruguha guro

✠ ✠ ✠ ✠ ✠

# राजीवलोचनम्[५]

## रागं: शङ्कराभरणम् (२९)    ताळं: तिश्र एकम्

### *नोट्टुस्वर साहित्यम्*

राजीवलोचनं रामचन्द्रं रामानुजाग्रं राजेन्द्रं
सद्गुणसान्द्रं कृपापाङ्गं सद् गुरुगुह मुदितं शान्तम्
रावणान्तकं जनकसुतारमणं भक्तभरणं
परमघनश्यामळं श्रीरघुकुलतिलकाभरणम्
भरतशत्रुघ्नसोदरं विभीषणविनुतपदं
सुग्रीवप्रमुखादिनुतपादपङ्कजं कौसल्यात्मजम्
कोदण्डकरं अहल्यादेवीशापविमोचनसुचरित्रं
कौस्तुभधारिणं कैवल्यप्रदं दशरथात्मजं भजेऽहम्

✠ ✠ ✠ ✠ ✠

# *rājīvalocanam*

## rāgaṁ: śaṅkarābharaṇam (29)    tāḷaṁ: tiśra ekam

### *noṭṭusvara sāhityam*

rājīvalocanaṁ rāmacandraṁ rāmānujāgraṁ rājendraṁ
sadguṇasāndraṁ kṙpāpāṅgaṁ sad guruguha muditaṁ śāntam
rāvaṇāntakaṁ janakasutāramaṇaṁ bhaktabharaṇaṁ
paramaghanaśyāmaḷaṁ śrīraghukulatilakābharaṇam
bharataśatrughnasodaraṁ vibhīṣaṇavinutapadaṁ

[५] not printed in Subbarāma Dīkṣitar's "*Praythamābhyāsa pustakamu*".

sugrīvapramukhādinutapādapaṅkajaṁ kausalyātmajam
kodaṇḍakaraṁ ahalyādevīśāpavimocanasucaritraṁ
kausthubhadhāriṇaṁ kaivalyapradaṁ daśarathātmajaṁ bhaje'ham

✠ ✠ ✠ ✠ ✠

# २१ रामचन्द्रं राजीवाक्षम्

## रामचन्द्रं राजीवाक्षम्

रागं: शङ्कराभरणम् (२९) तालं: चतुरश्र एकम्

***नोट्टुस्वर साहित्यम्***

रामचन्द्रं राजीवाक्षं श्यामळाङ्गं शाश्वतकीर्तिं
कोमलहस्तं कोसलराजं मामकहृत्कमलागारम्
मारुतियुक्तं धीमन्तं मानितभक्तं श्रीमन्तं
कौमारवरं गुरुगुह मित्रं कारुण्यनिधिं दशरथपुत्रम्
भूमिसुतापं भूपतिरूपं कोमलपल्लवपादं मोदं
कामगुरुं सीतारामं कौस्तुभभूषं वन्देऽहम्

✠ ✠ ✠ ✠ ✠

## *rāmacandraṁ rājīvākṣam*

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: caturaśra ekam

***noṭṭusvara sāhityam***

rāmacandraṁ rājīvākṣaṁ śyāmaḷāṅgaṁ śāśvatakīrtiṁ
komalahastaṁ kosalarājaṁ māmakahṛtkamalāgāram
mārutiyuktaṁ dhīmantaṁ mānitabhaktaṁ śrīmantaṁ
kaumāravaraṁ guruguha mitraṁ kāruṇyanidhiṁ daśarathaputram
bhūmisutāpaṁ bhūpatirūpaṁ komalapallavapādaṁ modaṁ
kāmaguruṁ sītārāmaṁ kaustubhabhūṣaṁ vande'ham

✠ ✠ ✠ ✠ ✠

# राम जनार्दन

रागं: शङ्कराभरणम् (२९) तालं: तिश्र एकम्

*नोट्टुस्वर साहित्यम्*

रामजनार्दन रावणमर्दन रामानुजाग्रज राजविभो
पामरमोचन पङ्कजलोचन भक्तजनप्रिय पालय माम्
भूमिजानायक भुक्तिप्रदायक भूसुरपालन भूमिपते
श्यामळविग्रह शान्त गुरुगुह संमत श्रीरामचन्द्रप्रभो

✠ ✠ ✠ ✠ ✠

## *rāma janārdana*

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: tiśra ekam

***noṭṭusvara sāhityam***

rāmajanārdana rāvaṇamardana rāmānujāgraja rājavibho
pāmaramocana paṅkajalocana bhaktajanapriya pālaya mām
bhūmijānāyaka bhuktipradāyaka bhūsurapālana bhūmipate
śyāmaḷavigraha śānta guruguha saṁmata śrīrāmacandraprabho

✠ ✠ ✠ ✠ ✠

# वन्दे मीनाक्षि

रागं: शङ्कराभरणम् (२९) तालं: चतुरश्र एकम्

*नोट्टुस्वर साहित्यम्*

वन्दे मीनाक्षि त्वां सरसिजवक्त्रेऽपर्णे दुर्गे
नतसुरबृन्देऽसक्ते गुरुगुह पालिनि जलरुहचरणे
सुन्दरपाण्ड्यानन्दे माये सूरिजनाधारे
सुन्दरराजसोदरि गौरि शुभकरि सततमहम्

✠ ✠ ✠ ✠ ✠

## *vande mīnākṣi*

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: caturaśra ekam

***noṭṭusvara sāhityam***

vande mīnākṣi tvāṁ sarasijavaktre'parṇe durge
natasurabṙnde'sakte guruguha pālini jalaruhacaraṇe
sundarapāṇḍyānande māye sūrijanādhāre
sundararājasodari gauri śubhakari satatamaham

✠ ✠ ✠ ✠ ✠

# वरदराज पहि

रागं: शङ्कराभरणम् (२९) तालं: तिश्र एकम्

*नोट्टुस्वर साहित्यम्*

वरदराज पाहि विभो करिगिरीश विश्वप्रभो
सुरपतिनुत नगधर नवनीतचोर गुरुगुहा दिविहित
मुरहर मुकुन्द श्री विहित मुरहर मुकुन्द श्री

✠ ✠ ✠ ✠ ✠

***varadarāja pahi***

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: tiśra ekam

***noṭṭusvara sāhityam***

varadarāja pāhi vibho karigirīśa viśvaprabho
surapatinuta nagadhara navanītacora guruguhā divihita
murahara mukunda śrī vihita murahara mukunda śrī

✠ ✠ ✠ ✠ ✠

# वरशिवबालम्

रागं: शङ्कराभरणम् (२९) ताळं: चतुरश्र एकम्

*नोट्टुस्वर साहित्यम्*

वरशिवबालं वल्लीलोलं वन्देऽनन्तं
हरिहरमोदं हंसानन्दं हससमुखम्[६]
गुरुगुह रूपं गुप्ताकारं गोरक्षं तं
सुरपतिसेनं सुब्रह्मण्यं सुरविनुतम्

✠ ✠ ✠ ✠ ✠

## *varaśivabālam*

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: caturaśra ekam

***noṭṭusvara sāhityam***

varaśivabālaṁ vallīlolaṁ vande'nantaṁ
hariharamodaṁ haṁsānandaṁ hasasamukham
guruguha rūpaṁ guptākāraṁ gorakṣaṁ taṁ
surapatisenaṁ subrahmaṇyaṁ suravinutam

✠ ✠ ✠ ✠ ✠

[६] हसितमुखं

# वाग्देवि मामव

रागं: शङ्कराभरणम् (२९) ताळं: चतुरश्र एकम्

*नोट्टुस्वर साहित्यम्*

वाग्देवि मामव कल्याणि वाणि ब्रह्माणि सुताम्रोष्ठि
वनजवदन गुरुगुह महिते देवसुरपतिविधिविहिते
वर्णमयि विलसितपदकमले वरमधुरकविजनमुदित-
हृदये वक्त्राब्जे नित्यं वरदे व्याससनकशुकमुनिगणमुदिते

✠ ✠ ✠ ✠ ✠

## *vāgdevi māmava*

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: caturaśra ekam

***noṭṭusvara sāhityam***

vāgdevi māmava kalyāṇi vāṇi brahmāṇi sutāmroṣṭhi
vanajavadana guruguha mahite devasurapatividhivihite
varṇamayi vilasitapadakamale varamadhurakavijanamudita-
hṛdaye vaktrābje nityaṁ varade vyāsasanakaśukamunigaṇamudite

✠ ✠ ✠ ✠ ✠

# शक्तिसहितगणपतिम्

रागं: शङ्कराभरणम् (२९) तालं: तिश्र एकम्

### *नोट्टुस्वर साहित्यम्*

शक्तिसहितगणपतिं शङ्करा दिसेवितं
विरक्तसकलमुनिवरसुरराजविनुत गुरुगुहम्
भक्ताळिपोषकं भवसुतं विनायकं
भुक्तिमुक्तिप्रदं भूषिताङ्गं रक्तपादाम्बुजं भावयामि

✠ ✠ ✠ ✠ ✠

## *śaktisahitagaṇapatim*

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: tiśra ekam

### *noṭṭusvara sāhityam*

śaktisahitagaṇapatiṁ śaṅkarā disevitaṁ
viraktasakalamunivarasurarājavinuta guruguha
bhaktāḷipoṣakaṁ bhavasutaṁ vināyakaṁ
bhuktimuktipradaṁ bhūṣitāṅgaṁ raktapādāmbujaṁ bhāvayāmi

✠ ✠ ✠ ✠ ✠

# शङ्करवर

रागं: शङ्कराभरणम् (२९)　　ताळं: तिश्र एकम्

## *नोट्टुस्वर साहित्यम्*

शङ्करवर पङ्कजकर शंभो देव पशुपते
ओंकाराकारसुतनो श्रीकाञ्चीनगरपते
एकाम्रेश गुरुगुहादिजनक मां पाहि (श्री)

✠ ✠ ✠ ✠ ✠

# ***śaṅkaravara***

rāgaṁ: śaṅkarābharaṇam (29)　　tāḷaṁ: tiśra ekam

## ***noṭṭusvara sāhityam***

śaṅkara vara paṅkajakara śaṁbho deva paśupate
oṁkārākārasutano śrīkāñcīnagarapate
ekāmreśa guruguhā dijanaka māṁ pāhi (śrī

✠ ✠ ✠ ✠ ✠

# शौरिविधिनुते [७]

रागं: शङ्कराभरणम् (२९)      ताळं: चतुरश्र एकम्

*नोट्टुस्वर साहित्यम्*

शौरिविधिनुते शाम्भवि ललिते शान्तेऽतीते शङ्करमुदिते
गौरि सुरहितैकाम्रपतियुते कामाक्षि मां पाहि
वीरवरविनुतचरणाम्भोजे धीरतरमलयवरहिमगिरिजे
शूरहरण गुरुगुह मातः संसारतरचरणतरकमले

✠ ✠ ✠ ✠ ✠

## *śaurividhinute*

rāgaṁ: śaṅkarābharaṇam (29)      tāḷaṁ: caturaśra ekam

***noṭṭusvara sāhityam***

śaurividhinute śāmbhavi lalite śānte'tīte śaṅkaramudite
gauri surahitaikāmrapatiyute kāmākṣi māṁ pāhi
vīravaravinutacaraṇāmbhoje dhīrataramalayavarahimagirije
śūraharaṇa guruguha mātaḥ saṁsārataracaraṇatarakamale

✠ ✠ ✠ ✠ ✠

[७] not printed in Subbarāma Dīkṣitar's "*Praythamābhyāsa pustakamu*".

# श्यामळे मीनाक्षि

रागं: शङ्कराभरणम् (२९) ताळं: चतुरस्र एकम्

*नोट्टुस्वर साहित्यम्*

श्यामळे मीनाक्षि सुन्दरेश्वरसाक्षि
शङ्करि गुरुगुहसमुद्भवे शिवेऽव
पामरमोचिनि पङ्कजलोचनि
पद्मासनवाणीहरिलक्ष्मीविनुते शांभवि

✠ ✠ ✠ ✠ ✠

## *śyāmaḷe mīnākṣi*

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: caturaśra ekam

***noṭṭusvara sāhityam***

śyāmaḷe mīnākṣi sundareśvarasākṣi
śaṅkari guruguha samudbhave śive'va
pāmaramocini paṅkajalocani
padmāsanavāṇīharilakṣmīvinute śāṁbhavi

✠ ✠ ✠ ✠ ✠

# सकलसुरविनुत

रागं: शङ्कराभरणम् (२९) तालं: चतुरश्र एकम्

*नोट्टुस्वर साहित्यम्*

सकलसुरविनुत शंभो स्वामिन्
विकट गुरुगुह विजय त्रिपुरहर
एकाम्रपते करुणामूर्ते एकानेकविभूते
एकान्तहृदय एकभोगदायकानन्दकर विभो

✠ ✠ ✠ ✠ ✠

## *sakalasuravinuta*

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: caturaśra ekam

***noṭṭusvara sāhityam***

sakalasuravinuta śaṁbho svāmin
vikaṭa guruguha vijaya tripurahara
ekāmrapate karuṇāmūrte ekānekavibhūte
ekāntahṛdaya ekabhogadāyakānandakara vibho

✠ ✠ ✠ ✠ ✠

# सदाशिवजाये

रागम्: शङ्कराभरणम् ताळम्: चतुरश्र एकम्

*नोट्टुस्वर साहित्यम्*

सदाशिवजाये विजये सरसिजपदयुगळे सकळे
वदनकराम्भोजे तारय शिववामाङ्के वरकरविधृतशुके
सदये गुरुगुह सेविते शशिशेखरसम्भाविते
सुधार्णवमध्यगतेऽतिललिते शुभकरसुरसुतमुरहरमुदिते

✠ ✠ ✠ ✠ ✠

**sadāśivajāye**

rāgam: śaṅkarābharaṇam tāḷam: caturaśra ekam

***noṭṭusvara sāhityam***

sadāśivajāye vijaye sarasijapadayugaḷe sakaḷe
vadanakarāmbhoje tāraya śivavāmāṅke varakaravidhṛtaśuke
sadaye guruguha sevite śaśiśekharasambhāvite
sudhārṇavamadhyagate'tilalite śubhakarasurasutamuraharamudite

✠ ✠ ✠ ✠ ✠

# सन्ततं गोविन्दराजम्

रागं: शङ्कराभरणम् (२९) तालं: तिश्र एकम्

*नोट्टुस्वर साहित्यम्*

सन्ततं गोविन्दराजं सदा वन्दितनारदमुनिबृन्दं
सन्तानकृष्णं आनन्दकन्दं चिन्तितं चिदानन्दकन्दम्
रुक्मिणीसत्यभामासमेतम् नीलमेघजितसुन्दरगात्रं
शङ्खचक्रधरं शान्तपङ्कजपादं पद्मकरं परशुरामसेवितम्
गुरुगुहमुदं सार्वभौमनन्दगोपालं
गिरिधरं वेणुगानलोलं स्मराम्यहम्

✠ ✠ ✠ ✠ ✠

## *santataṁ govindarājam*[८]

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: tiśra ekam

***noṭṭusvara sāhityam***

santataṁ govindarājaṁ sadā vanditanāradamunibṙndaṁ
santānakṙṣṇaṁ ānandakandaṁ cintitaṁ cidānandakandam
rukmiṇīsatyabhāmāsametam nīlameghajitasundaragātraṁ
śaṅkhacakradharaṁ śāntapaṅkajapādaṁ padmakaraṁ paraśurāmasevitam
guruguha mudaṁ sārvabhaumanandagopālaṁ
giridharaṁ veṇugānalolaṁ smarāmyaham

✠ ✠ ✠ ✠ ✠

[८] not printed in Subbarāma Dīkṣitar's "*Praythamābhyāsa pustakamu*".

# सन्ततं पाहि माम्

रागं: शङ्कराभरणम् (२९)  ताळं: तिश्र एकम्

*नोट्टुस्वर साहित्यम्*

सन्ततं पाहि मां सङ्गीतश्यामळे
सर्वाधारे जननि रे जननि
चिन्तितार्थप्रदे चिद्रूपिणि शिवे
श्री गुरुगुह सेविते शिवमोहाकारे

✠ ✠ ✠ ✠ ✠

## *santataṁ pāhi mām*

rāgaṁ: śaṅkarābharaṇam (29)  tāḷaṁ: tiśra ekam

***noṭṭusvara sāhityam***

santataṁ pāhi māṁ saṅgītaśyāmaḷe
sarvādhāre janani re janani
cintitārthaprade cidrūpiṇi śive
śrī guruguha sevite śivamohākāre

✠ ✠ ✠ ✠ ✠

# सन्तानसौभाग्य

रागं: शङ्कराभरणम् (२९)  तालं: तिश्र एकम्

## *नोट्टुस्वर साहित्यम्*

सन्तानसौभाग्यलक्ष्मीकलत्रं
सङ्गीतसाहित्यामोदं पवित्रम्
कुन्तीसुताप्तं कोटीरदीप्तं
शान्तं भजेऽनन्दमानन्दकन्द-
मुकुन्दं दयासागरं पादपद्मम्

✠ ✠ ✠ ✠ ✠

# *santānasaubhāgya*

rāgaṁ: śaṅkarābharaṇam (29)  tāḷaṁ: tiśra ekam

## *noṭṭusvara sāhityam*

santānasaubhāgyalakṣmīkalatraṁ
saṅgītasāhityāmodaṁ pavitram
kuntīsutāptaṁ koṭīradīptaṁ
śāntaṁ bhaje'nandamānandakanda-
mukundaṁ dayāsāgaraṁ pādapadmam

✠ ✠ ✠ ✠ ✠

# सामगानप्रिये

रागं: शङ्कराभरणम् (२९)　　ताळं: तिश्र एकम्

*नोट्टुस्वर साहित्यम्*

सामगानप्रिये कामकोटिनिलये
शङ्करि सुन्दरि सारतरलहरि
चण्डिके निर्मले कामिनि मोदिनि पाहि गुरुगुह जननि

✠ ✠ ✠ ✠ ✠

## *sāmagānapriye*

rāgaṁ: śaṅkarābharaṇam (29)　　tāḷaṁ: tiśra ekam

***noṭṭusvara sāhityam***

sāmagānapriye kāmakoṭinilaye
śaṅkari sundari sārataralahari
caṇḍike nirmale kāmini modini pāhi guruguha janani

✠ ✠ ✠ ✠ ✠

# सुब्रह्मण्यम्[१]

रागं: शङ्कराभरणम् (२९)   ताळं: चतुरश्र एकम्

*नोट्टुस्वर साहित्यम्*

सुब्रह्मण्यं सुरसेव्याब्जपदं
सुन्दरवदनं सुकुमारविनुतलावण्यं
शुभगात्रं शुभकरनेत्रं सोमात्मकमाश्रितकल्पभूमिरुहं
सूरि गुरुगुहं सुरराजविधिविनुतसर्वज्ञं
सुमते चिन्तय गुरुनाथं
स्वाज्ञानविदारणपण्डितसाधुजनं सूनृतवचनम्

✠ ✠ ✠ ✠ ✠

## subrahmaṇyam

rāgaṁ: śaṅkarābharaṇam (29)   tāḷaṁ: caturaśra ekam

***noṭṭusvara sāhityam***

subrahmaṇyaṁ surasevyābjapadaṁ
sundaravadanaṁ sukumāravinutalāvaṇyaṁ
śubhagātraṁ śubhakaranetraṁ somātmakamāśritakalpabhūmiruhaṁ
sūri guruguhaṁ surarājavidhivinutasarvajñaṁ
sumate cintaya gurunāthaṁ
svājñānavidāraṇapaṇḍitasādhujanaṁ sūnṛtavacanam

✠ ✠ ✠ ✠ ✠

[१] not printed in Subbarāma Dīkṣitar's "*Prathamābhyāsa pustakamu*".

# सोमास्कन्दम्

रागं: शङ्कराभरणम् (२९)  तालं: तिस्र एकम्

*नोट्टुस्वर साहित्यम्*

सोमास्कन्दं स्वानन्दकन्दं कामाक्षीशं कल्याणवेषं
सोमास्कन्दं स्वानन्दकन्दं सुन्दराङ्गमाश्रयामि
गङ्गाधरं तं गौरीसमेतं शृङ्गाररूपं श्रीसोमसुन्दरं
गङ्गाधरं तं गौरीसमेतं गुरुगुह रूपमाश्रयामि

✠ ✠ ✠ ✠ ✠

## *somāskandam*

rāgaṁ: śaṅkarābharaṇam (29)  tāḷaṁ: tiśra ekam

***noṭṭusvara sāhityam***

somāskandaṁ svānandakandaṁ kāmākṣīśaṁ kalyāṇaveṣaṁ
somāskandaṁ svānandakandaṁ sundarāṅgamāśrayāmi
gaṅgādharaṁ taṁ gaurīsametaṁ śṛṅgārarūpaṁ śrīsomasundaraṁ
gaṅgādharaṁ taṁ gaurīsametaṁ guruguha rūpamāśrayāmi

✠ ✠ ✠ ✠ ✠

# हे माये

रागं: शङ्कराभरणम् (२९) तालं: तिस्र एकम्

*नोट्टुस्वर साहित्यम्*

हे माये मां बाधितुं का हि त्वं का हि त्वं पाहि याहि
कामाक्षि काञ्चीपुरनायिके रक्षितुं एहि एहि
कामकोटीश्वरि कामितार्थप्रदैकाम्रनाथेश्वरि पाहि पाहि
कामसञ्जीविनि सेवितश्रीगुरो कौळिनि मे मुदं देहि देहि

✠ ✠ ✠ ✠ ✠

## *he māye*

rāgaṁ: śaṅkarābharaṇam (29) tāḷaṁ: tiśra ekam

***noṭṭusvara sāhityam***

he māye māṁ bādhituṁ kā hi tvaṁ kā hi tvaṁ pāhi yāhi
kāmākṣi kāñcīpuranāyike rakṣituṁ ehi ehi
kāmakoṭīśvari kāmitārthapradaikāmranātheśvari pāhi pāhi
kāmasañjīvini sevitaśrīguro kauḷini me mudaṁ dehi dehi

✠ ✠ ✠ ✠ ✠